International Journal of Academic Research and Development
ISSN: 2455-4197, Impact Factor: RJIF 5.22
www.academicsjournal.com
Volume 1; Issue 10; October 2016; Page No. 46-47

# संस्कृतवाङ्मयस्य नैतिकशिक्षायाः राष्ट्रनिर्माणे योगदानम्

**डॉ0 छगन लाल शर्मा**
राष्ट्रीय संस्कृत विद्यापीठ तिरूपती, आंध्र प्रदेश, भारत।

**प्रस्तावना**

संस्कृतवाङ्मयं नाम सकलवेदशास्त्रसंयुक्तं निखिललोकसुरक्षकं कृत्याकृत्य–प्रतिपादकत्वेन नित्यनियतोपादेयं साक्षात् वेदार्था–नामनुमापकत्वेन वेदवत्प्रमाणम्। तपःस्वाध्यायपूतचरित्राणां यमनियमानुष्ठानप्रयतात्मनां सकलसंस्कारसंस्कृतानाम् आत्मगुण–विद्योतितान्तः करणानां सकलभूतहितकाङ्क्षिणां रागद्वेषरहितानाम् अस्मदृषीणां नित्यस्वाध्ययनपूतकण्ठोद्गीर्णत्वेन सर्वजनग्रहणीयं गुणिगण–समादरणीयं विश्वस्य प्राचीनतमं साहित्यम्।

नीतियुता (सदाचारव्यवहारादीनाम्) शिक्षा एव नैतिकशिक्षा इति कथ्यते। अधः प्रदत्तोऽयं श्लोकः नैतिकशिक्षां सम्यक् परिभाषयति–

**यस्मिन् देशे य आचारः पारम्पर्यक्रमागतः।**
**वर्णानां सान्तरालानां स सदाचार उच्यते।।**

अर्थात् यस्मिन् राष्ट्रे यः व्यवहारः सान्तरालानां वर्णानां परम्परया क्रमेण च आगतः स सदाचारः नैतिको व्यवहारो वा कथ्यते।

नैतिकशब्दोऽयं आङ्गलभाषायां Ethics एवं Moral इति नाम्ना व्यवह्रियते। आङ्गलभाषायां 'एथिक्स' नाम मानवोपरि बलात् आरोपिताः नैतिकाचाराः एवं 'मॉरल' नाम स्वतः प्रेरणया क्रियमाणाः सुव्यवहाराः। संस्कृतभाषायान्तु उभयमपि (एथिक्स, मॉरल इति) नीतिशिक्षा–न्तर्गतत्वेन अङ्गीक्रियते।

अधुनाऽयं प्रश्नः यत् कथमियं संस्कृतवाङ्मयस्य नैतिकीशिक्षा राष्ट्रनिर्माणे उपकरोति? इति चेत् – वैदिक–लौकिक–भेदेन द्विधा विद्यमानस्य संस्कृतवाङ्मयस्य प्रत्येकं शब्दः मानवम् अभ्युदयाय, सद्व्यवहाराय, समाज–राज्य राष्ट्रनिर्माणाय च प्रेरयति।

**उदाहरणार्थम्**

असतो मा सद्गमय, तमसो मा ज्योतिर्गमय, मृत्योर्माऽमृतं गमय।।
मन्त्रोऽयं मानवम् असतः = दुष्टात् मार्गात् सत् = साधुमार्गं प्रति गन्तुं प्रेरयति (ईश्वरप्रार्थनया)। मनुष्यम् अज्ञानरूपिणः अन्धकारात् ज्ञानरूपिणं प्रकाशं प्रति गन्तुम् अभिप्रेरयति एवं मृत्योः अमरतां प्रति गन्तुम् आदिशति।

**सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्,**
**देवाः भागं यथा पूर्वे सञ्जानाना उपासते।।**

(ऋग्वेदः 16.191.2.4)

एषः मन्त्रः अखिलां मानवजातिं पारस्परिकसद्भावाय प्रेरयति। यथा देवाः सर्वेऽपि स्व–स्व–भागाय (हविः समये) शान्तभावेन प्रतीक्षन्ते। यस्य यसो भागः तत् तस्यैव देवस्य भवति, अन्यः देवः तदपहर्तुं नेच्छति तथा मानवाः अपि स्व–स्व भागे सन्तुष्टाः सन्तः प्रेमपूर्वकं जीवनं यापयेपुः इति बोधयति एषः मन्त्रः। इममेव भावं एषः मन्त्रोऽपि बोधयति –

**समानी व आकूतिः समानाः हृदयानि वः।**
**समानमस्तु वो मनो यथा वः सुसहासति।।**

(ऋग्वेदः 10.191.2.84)

'ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः' इति अद्वैतवेदान्तघोषस्य अर्थं सर्वोऽपि मानवः ज्ञास्यति चेत् जाति–हिंसा–साम्प्रदायिक–विघटन–समस्यानां कस्मिन्नपि राष्ट्रे उद्भवो कदापि न भविष्यति इति शोधकर्तुः आशयः। यतो हि सर्वोऽपि जीवः ब्रह्ममयः चेत् कः श्रेष्ठः को वा निकृष्टः? कः नीचः को वा उच्चः? को धनिकः निर्धनो वा?

अर्थात् सर्वेऽपि समानाः भविष्यन्ति तेन परस्पर–कलहोऽपि न भविष्यति।

अद्यत्वे जायमानाः मुजफ्फरनगरसदृश्यः साम्प्रदायिकघटनाः अपि न सम्भविष्यन्ति यदि उपर्युक्ताः सूक्तयः मानवजात्या सम्यक्तया मनसि धार्यन्ते चेत्। वैदिकसाहित्यं राष्ट्रभावनाम् उत्पादयितुं मानवहृदि सर्वदा सर्वथा च यतमानो दृश्यते। यथा –

**"माता भूमिः पुत्रोऽहं पृथिव्याः।**
**पुनश्च निगदति – मातृदेवो भव**

(अथर्ववेदः, 12.1.12)

अर्थात् देशः मातुस्तुल्यं भवति, माता च देवता भवति अतः देशस्य सेवा देववत् कार्या इति।

**सा मातृभूमिरस्मान् पुत्रवद् गणयन्ती सुखं समृद्धिं**
**तेजश्च दिशेत्। तत्पुत्राः वयं सहोदरवद् व्यवहरेम।**
**सा नो भूमिर्विसृजतां माता पुत्राय मे पयः**

(अर्थर्ववेदः 12.1.10)

मानवजीवनस्य परमं लक्ष्यं भवति – सत्यान्वेषणम्। तदाधारी–कृत्य उच्यते –

**हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।**
**तत्त्वं पूषन् अपावृणु सत्यधर्माय दृष्टये।। इति।**

'मनः एव मनुष्याणां कारणं बन्धमोक्षयोः' इति भावं मनसि निधाय मानवः प्रार्थयति ईश्वरम् –

**'यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।'**
**दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु।**

(शुक्लयजुर्वेदः शिवसङ्कल्पसूक्तम्)

एवमेव सदाचारस्य शिक्षा – मातृ देवो, पितृ देवो भव, अतिथि देवो भव, स्वाध्यायान्मा प्रमदितव्यम् (शिक्षावल्ली, तैत्तिरीयोपनिषद्) इत्यादिभ्यः सूक्तिभ्यः ग्राह्या।

इत्येवं रीत्या संस्कृतवाङ्मयं मानवं आध्यात्मिक – सामाजिकार्थिक – सांस्कृतिक – राजनीतिकाभ्युदयाय प्रेरयति। पुनः च मानवोभ्युदये सति समाजोन्नतिः, समाजोभ्युदये सति राज्याभ्युदयः, राज्याभ्युदये सति राष्ट्राभ्युदयः।

लौकिकसाहित्ये विद्यमानया नैतिकशिक्षया न केवलम् अस्मदीयं भारतमेव अभ्युन्नतिम् आप्नोति अपितु सम्पूर्णं विश्वं अस्मत–

संस्कृत – साहित्यस्य कारणेन उन्नतिपथे अग्रसरो दृश्यते। यतो हि–

**"एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।। इति।**

उपर्युक्तैः सन्दर्भैः निश्चप्रचमेतत् वक्तुं शक्यते यत् संस्कृतवाङ्मयस्य महद् योगदानम् अस्ति राष्ट्रनिर्माणे इति शम्।

## संदर्भ ग्रन्थ सूची


| | ग्रन्थ नाम | लेखक / सम्पादक | प्रकाशन |
|---|---|---|---|
| 1. | अभिज्ञानशाकुन्तलम् | कालिदासः | चौखम्भाप्रकाशन वाराणसी |
| 2. | ईशादि नौ उपनिषद् | | गीता प्रेस गोरखपुर |
| 3. | कालिदासग्रन्थावली | पं. सीताराम चतुर्वेदी | उ.प्र. संस्कृत संस्थान |
| 4. | कालिदासग्रन्थावली | रामचन्द्र मिश्र | चौखम्भासुरभारती प्रकाशन, वाराणसी |
| 5. | नीतिशतकम् | भर्तृहरिः | चौखम्भाविद्याभवन, वाराणसी |
| 6. | पंचतन्त्रम् | विष्णुशर्मा | चौखम्भाविद्याभवन, वाराणसी |
| 7. | मनुस्मृतिः 'मन्वर्थमुक्तावली' व्याख्योपेत | श्रीकुल्लूकभट्टः | चौखम्भा संस्कृत प्रतिष्ठान, दिल्ली |
| 8. | रघुवंशमहाकाव्यम् | कालिदासः | चौखम्भा–प्रकाशनकृष्ण दास अकादमी वाराणसी |
| 9. | संस्कतनिबन्धशतकम् | डॉ. कपिलदेव द्विवेदी | विश्वविद्यालय प्रकाशन वाराणसी |
| 10. | संस्कृत वाङ्मय का वृहद् इतिहास | बलदेव उपाध्याय | उ.प्र. संस्कृत संस्थान |
| 11. | संस्कृत साहित्य का इतिहास | आचार्य रामचन्द्र मिश्र | चौखमीामहाविद्याभवन वाराणसी |
| 12. | संस्कृत साहित्य का इतिहास | डॉ. उमाशंकर ऋषि | चौखम्भा विश्वभारतीय वाराणसी |
| 13. | संस्कृत प्रभा | डॉ. कपिलदेव द्विवेदी | उ.प्र. संस्कृत संस्थान |
| 14. | हितोपदेशः | नारायणपण्डितः | चौखम्भाविद्याभवन, वाराणसी |